vedamnadam

# 6 – अथ षष्ठ दशकम्

## ॥ विराड्देहस्य जगदात्म तत्त्वम्॥

एवं चतुर्दशजगन्मयतां गतस्य
पातालमीश! तव पादतलं वदन्ति ।
पादोर्ध्वदेशमपि देव रसातलं ते
गुल्फद्वयं खलु महातलमद्भुतात्मन् ॥ (6.1)

जंघे तलातलमथो सुतलं च जानू
किंचोरुभागयुगलं वितलातले द्वे ।
क्षोणीतलं जघनमम्बरमंग! नाभिः
वक्षश्च शक्रनिलयस्तव चक्रपाणे! ॥ (6.2)

ग्रीवा महस्तव मुखं च जनस्तपस्तु
फालं शिरस्तव समस्तमयस्य सत्यम् ।
एवं जगन्मयतनो! जगदाश्रितैर-
प्यन्यैर्निबद्धवपुषे भगवन् नमस्ते! ॥ (6.3)

त्वद्ब्रह्मरन्ध्रपदमीश्वर! विश्वकन्द!
छन्दांसि केशव घनास्तव केशपाशाः ।
उल्लासि चिल्लियुगलं द्रुहिणस्य गेहम्
पक्ष्माणि रात्रिदिवसौ सविता च नेत्रे! ॥ (6.4)

निश्शेषविश्वरचना च कटाक्षमोक्षः
कर्णौ दिशोऽश्वियुगलं तव नासिके द्वे ।
लोभत्रपे च भगवन्नधरोत्तरोष्ठौ

तारागणाश्च रदनाः शमनश्च दंष्ट्रा ॥ (6.5)

माया विलासहसितं श्वसितं समीरो
जिह्वा जलं वचनमीश! शकुन्तपंक्तिः ।
सिद्धादयस्स्वरगणा मुखरन्ध्रमग्निः
देवा भुजा स्तनयुगं तव धर्मदेवः ॥ (6.6)

पृष्ठं त्वधर्म इह देव! मनस्सुधांशुः
अव्यक्तमेव हृदयाम्बुजमम्बुजाक्ष! ।
कुक्षिस्समुद्रनिवहा वसनं तु सन्ध्ये
शेफः प्रजापतिरसौ वृषणौ च मित्रः ॥ (6.7)

श्रोणिस्थलं मृगगणाः पदयोर्नखास्ते
हस्त्युष्ट्रसैन्धवमुखा गमनं तु कालः ।
विप्रादिवर्णभवनं वदनाब्जबाहु-
चारूरुयुग्मचरणं करुणाम्बुधे! ते ॥ (6.8)

संसारचक्रमयि! चक्रधर! क्रियास्ते
वीर्यं महासुरगणोऽस्थिकुलानि शैलाः ।
नाड्यस्सरित्समुदयस्तरवश्च रोमाः
जीयादिदं वपुरनिर्वचनीयमीश! ॥ (6.9)

ईदृग्जगन्मयवपुस्तव कर्मभाजां
कर्मावसानसमये स्मरणीयमाहुः ।
तस्यान्तरात्मवपुषे विमलात्मने ते
वातालयाधिप! नमोऽस्तु निरुन्धि रोगान् ॥ (6.10)

॥ इति विराड्देहस्य जगदात्म तत्त्वमु षष्ठ दशकम् संपूर्णम् ॥